नं० १०८६-च

पवनविजयः पवनविजयः (तन्त्रम्)

(स्वरोदयः) पत्राणि १४ (सम्पूर्णम्)

१४ पत्रे

सं. १०८८६

ॐ
स॰ द॰
१

ॐ श्रीगणेशाय नमः ॥ महेश्वरं नमस्कृत्य शैलेयं गणनायकम् गुरुं च परमात्मानं नित्यं संसार
तारकम् १ श्रीदेव्युवाच देवदेव महादेव कृपां कृत्वा ममोपरि सर्वसिद्धिकरं ज्ञानं कथयस्व मम
प्रभो २ कथं ब्रह्माण्डमुत्पन्नं कथं वा परिवर्तते कथं विलीयते देव वद ब्रह्माण्डनिर्णयः ३ श्री
ईश्वर उवाच तत्त्वाद् ब्रह्माण्डमुत्पन्नं तत्त्वेन परिवर्तते तत्त्वे विलीयते देवि तत्त्वाद् ब्रह्माण्डनिर्णयः ४
श्रीदेव्युवाच तत्त्वमेव परं मूलं निश्चितं तत्त्ववादिभिः तत्त्वस्वरूपं किं देव तत्त्वमेव प्रकाशय ५ ईश्व
र उवाच निरञ्जनो निराकार एको देवो महेश्वरः तस्मादाकाशमुत्पन्नमाकाशाद्वायुसम्भवः ६
वायोस्तेजस्ततश्चापस्ततः पृथ्वीसमुद्भवः एतानि पञ्च तत्त्वानि विस्तीर्णानि च पञ्चधा ७ तेभ्यो ब्रह्मा
ण्डमुत्पन्नं तैरेव परिवर्तते विलीयते च तत्रैव तत्रैव रमते पुनः ८ पञ्चतत्त्वमये देहे पञ्चतत्त्वानि सुन्दरि
सूक्ष्मरूपेण वर्तंते ज्ञायते तत्त्वयोगिभिः ९ अतः परं प्रवक्ष्यामि शरीरस्थं स्वरोदयम् हंसचारस्वरूपेण
भवेज्ज्ञानं त्रिकालजं १० गुह्याद्गुह्यतरं सारमुपकारप्रकाशकम् इदं स्वरोदयं ज्ञानं ज्ञानानां मस्तके
मणिः ११ सूक्ष्मात्सूक्ष्मतरं ज्ञानं सुबोधं सत्यमव्ययम् आश्चर्यं नास्तिके लोके आधारः स्वास्तिके
जने १२ अथ शिष्यलक्षणम् शान्ते शुद्धे सदाचारे गुरुभक्त्यैकमानसे दृढचित्ते कृतज्ञे च देयं चैव स्व

राम
१

रोदयं १३ दुष्टे च दुर्जने क्रुद्धे नास्तिके गुरुतल्पगे हीनसत्त्वे दुराचारे स्वरज्ञानं न दीयते १४ शृणुत्वं
कथितं देवि देहस्थं ज्ञानमुत्तमम् येन विज्ञानमात्रेण सर्वज्ञत्वं प्रजायते १५ स्वरे वेदाश्च शास्त्राणि स्व
रे गान्धर्वमुत्तमम् स्वरे च सर्वं त्रैलोक्यं स्वरमात्मस्वरूपकम् १६ स्वरहीने च दैवज्ञे नाथहीने यथा गृ
हम् शास्त्रहीने यथा वक्त्रे शिरोहीनं च यद्वपुः १७ नाडीभेदं तथा प्राणं तत्त्वभेदं तथैव च सुषुम्ना
मिश्रभेदं च यो जानाति स मुक्तिगः १८ साकारे वा निराकारे शुभे वायुबलात्कृते कथयंति शुभे किंचि
त्स्वरज्ञाने वरानने १९ ब्रह्माण्डखण्डपिण्डाद्य स्वरेणैव हि निर्मितम् सृष्टिसंहारकर्ता च स्वरः साक्षान्म
हेश्वरः २० स्वरज्ञानात्परं गुह्यं स्वरज्ञानात्परं धनम् स्वरज्ञानात्परं मित्रं न वा दृष्टं न वा श्रुतम् २१ शत्रु
हन्यात्स्वरबले तथा मित्रसमागमे लक्ष्मीः प्राप्तिः स्वरबले कीर्तिः स्वरबले सुखम् २२ कन्याप्राप्तिः स्व
बले स्वरे च राजदर्शनम् स्वरे च देवतासिद्धिः स्वरे च क्षितिपो वशः २३ स्वरेन गम्यते देशो भोज्यं स्वरब
लेन था लघुदीर्घं स्वरबले मलं चैव निवारयेत् २४ सर्वशास्त्रपुराणादिस्मृतिवेदाङ्गपूर्वकम् स्वरज्ञा
नात्परं तत्त्वं नास्ति किंचिद्वरानने २५ नामरूपादिकाः सर्वे मिथ्या सर्वेषु विभ्रमः अज्ञानमोहिता मूढा
यावत्तत्त्वं न विद्यते २६ इदं स्वरोदयं शास्त्रं सर्वशास्त्रोत्तमोत्तमम् आत्मघटप्रकाशार्थं प्रदीपकलि

स्व॰
टी॰
२
2

कोपमम् २७ यस्मिन्सैन्ववत्कत्वेप्रोक्तेचप्रश्नेऽत्रनवे तस्मादेतत्त्वयंज्ञेयमात्मनैवात्मनात्मनि २८
नतिथिर्नैचनक्षत्रं नवारोनग्रहदेवता नचविष्टिर्व्यतीपातो वैधृत्याद्यास्तथैवच २९ कुयोगोनास्तिदे
वेशि भवतिनकदाचन प्राप्ते स्वरबले युक्ते सर्वमेवशुभफलम् ३० देहमध्ये स्थितानाड्यो बहुत्वया
द्बविस्तराः ज्ञातव्याश्चबुधैर्नित्यं स्वदेहज्ञानहेतवे ३१ नाभिस्थानककंदोर्ध्वमंकुरादिवनिर्गताः द्वि
सप्ततिसहस्राणि देहमध्ये व्यवस्थिताः ३२ नाभिस्थाकुंडलीशक्तिर्भुजंगाकारशायिणी ततोदशो
र्ध्वगानाड्यो दशैवाधःप्रतिष्ठिताः ३३ द्वेद्वेतिर्यग्गतानाड्यश्चतुर्विंशतिसंख्यया प्रधानादशनाड्य
स्तु दशवायुप्रवाहकाः ३४ तिर्यगूर्ध्वमधःस्थानावायुदेहसमन्विता चक्रवत्संस्थितादेहे सर्वप्रा
णसमाश्रिताः ३५ तासांमध्ये दशश्रेष्ठा दशानांतिस्रउत्तमाः इडाचपिंगलाचैव सषुम्णाचतृतीयका
३६ गांधारीहस्तिनीजिह्वा पूषाचैवयशस्विनी अलंबुषाकुहूश्चैवशंखिनीदशमीतथा ३७ इडावा
मेस्थिताभागेदक्षिणेपिंगलातथा सषुम्णामध्यदेशेतुगांधारीवामचक्षुषि ३८ दक्षिणेहस्तिजि
ह्वाचपूषाकर्णेचदक्षिणे यशस्विनीवामकर्णेआननेचाप्यलंबुषा ३९ कुहूश्चलिंगदेशेतुमूलस्थाने
चशंखिनी एवंद्वारंसमाश्रित्यतिष्ठंतिदशनाडिका ४० इडापिंगलासषुम्णाप्राणमार्गेसमाश्रिताः

राम
२

एताविदशनाड्यस्तुदेहमध्येव्यवस्थिताः ४१ नामानिनाडिकानांतुवातानांप्रवदाम्यहम् प्राणोपानः
समानश्चउदानोव्यानएवच ४२ नागःकूर्मोथकृकलोदेवदत्तोधनंजयः हृदिप्राणोवसेन्नित्यमपानो
गुदमंडले ४३ समानोनाभिदेशेतुउदानःकंठमध्यगः व्यानोव्यापिशरीरेषुप्रधानादशवायवः ४४
प्राणाद्याःपंचविख्याताःनागाद्याःपंचवायवः तेषामपिचपंचानांस्थानानिचवदाम्यहम् ४५ उद्गारे
नागआख्यातःकूर्मउन्मीलनेस्मृतः कृकलाक्षुतकृज्ञेयोदेवदत्तोविजृंभणे ४६ नजहातिमृतेवा
पिसर्वव्यापीधनंजयः एतेनाडीषुसर्वासुभ्रमंतेजीवरूपिणः ४७ प्रकटंप्राणसंचारंलक्षयेद्देहमध्य
तः इडापिंगलासुषुम्णानाडीभिस्तिसृभिर्बुधः ४८ इडावामेचविज्ञेयापिंगलादक्षिणेस्मृता इडानाडी
स्थितावामेततोव्यस्ताचपिंगला ४९ इडायांसंस्थितश्चंद्रःपिंगलायांचभास्करः सुषुम्णाशंभुरूपेण
शंभुर्हंसस्वरूपकः ५० हकारोनिर्गमेप्रोक्तःसकारेणप्रवेशनं हकारःशिवरूपेणसकारःशक्तिरु
च्यते ५१ शक्तिरूपस्थितश्चंद्रोवामनाडीप्रवाहकः दक्षनाडीप्रवाहश्चशंभुरूपोदिवाकरः ५२ श्वासेस
कारसंस्थेतुयद्दानंदीयतेबुधैः नदानंजीवलोकेस्मिन्कोटिकोटिगुणंभवेत् ५३ अनेनलक्षयेद्योगी
चैकचित्तःसमाहितः सर्वमेवविजानीयान्मार्गेवैचंद्रसूर्ययोः ५४ ध्यायेत्तत्त्वंस्थिरेजीवेअस्थिरेनकदा

स्व चन इष्टसिद्धिर्भवेत्तस्य महालाभो जयस्तथा ५५ चंद्रसूर्य्यसमाभ्यासं ये कुर्वन्ति सदा नराः अतीता
नागतं ज्ञानं तेषां हस्तगतं सदा ५६ वामे चामृतरूपं स्यात् जगदाप्यायनं परम् दक्षिणे चरभागेन ज
२ गदुत्पादयेत् सदा ५७ मध्यमा भावति क्रूरा दुष्टा सर्वत्र कर्मसु सर्वत्र शुभकार्य्येषु वामा भवति सिद्धिदा
3 ५८ निर्गमे तु शुभा वामा प्रवेशे दक्षिणा शुभा चंद्रः समस्तु विज्ञेयो रविस्तु विषमः सदा ५९ चंद्रः स्त्री पुरु
षः सूर्य्यो चंद्रो गौरोऽसितो रविः चंद्रनाडीप्रवाहेन सौम्यकर्माणि कारयेत् ६० सूर्यनाडीप्रवाहेन रौद्रक
र्माणि कारयेत् सुषुम्णायाः प्रवाहेन सिद्धिमुक्तिफलानि च ६१ आदौ चंद्रः सिते पक्षे भास्करस्तु सितेत
रे प्रतिपद्यादितोऽन्याहुः त्रीणि त्रीणि क्रमोदये ६२ सार्द्धद्विघटिके ज्ञेयाः शुक्ले कृष्णे शशी रविः वहत्येक
दिने नैव यथा षष्टिघटिकाः क्रमात् ६३ वहेत्तावद्घटीमध्ये पंचतत्त्वानि निर्दिशेत् प्रतिपद्यादितोऽन्याहुर्विपरी शि ८
ते विपर्ययः ६४ शुक्लपक्षे भवेद्वामा कृष्णपक्षे च दक्षिणा जानीयात्प्रतिपत्पूर्वं योगी तद्गतमानसः
६५ उदयं चंद्रमार्गेण सूर्येणास्तंगतं यदि दधाति गुणसंघातं विपरीते विपर्ययः ६६ शशांकं वार
येद्रात्रौ दिवा वार्य्यो दिवाकरः इत्यभ्यासरतो नित्यं स योगी नात्र संशयः ६७ सूर्येण वध्यते सूर्यः चंद्रश्चं स्याम
द्रेण वध्यते यो जानाति क्रियामेतां त्रैलोक्यं वशयेत्क्षणात् ६८ गुरुशुक्रबुधेन्दूनां वासरे वामनाडि २

का सिद्धिदा सर्वकार्येषु शुक्लपक्षे विशेषतः ६९ अर्कांगारकसौरीणां वासरे दक्षनाडिका: स्मर्ता
व्याघ्रकार्येषु कृष्णपक्षे विशेषतः ७० प्रथमे वहते वायुः द्वितीये च तथानलः तृतीये वहेन्माहेन्माहेये
चतुर्थे वारुणं वहेत् ७१ एकैकस्य घटी पंच क्रमेणैवोदयन्ति च क्रमादेकैकनाडीनां तत्त्वानां पृथगुद्भ
वः ७२ अहोरात्रस्य मध्ये तु ज्ञेया द्वादशसंक्रमात् वृषकर्कटकन्यालिमृगमीननिशाकरे ७३ मे
षे सिंहे च धनुषि तुलायां मिथुने घटे उदयो दक्षिणे ज्ञेयः शुभाशुभविनिर्णयः ७४ तिष्ठेत्पूर्वोत्तरे
चंद्रो भानुः पश्चिमदक्षिणे दक्षनाड्याः प्रवाहे तु न गच्छेद्याम्यपश्चिमे ७५ वामचारप्रवाहे तु न गच्छे
त्पूर्वमुत्तरे परिपंथिभयं तस्य गतोसौ न निवर्तते ७६ तस्मात्तत्र न गंतव्यं बुधैः सर्वहितेप्सुभिः त
दा तत्र तु संघाते मृत्युरेव न संशयः ७७ शुक्लपक्षे द्वितीयायां अर्के वहति चेन्द्रमाः दृश्यते लाभदः
पुंसां सौम्ये सौख्यं प्रजायते ७८ सूर्योदये यदा सूर्यः चेन्द्र चन्द्रोदयो भवेत् उद्वेगकलहो हानिः
शुभं सर्वं निवारयेत् ७९ सूर्यस्य वाहं प्रवदंति विज्ञा नेष्वात्तस्य तोयुक्तमनिष्पतेस्यः श्वासेन युक्तस्य
तु शीतरश्मेः प्रवाहकाले फलमन्यथा स्यात् ८० विपरीतलक्षणम् यदा प्रत्यूषकाले तु विपरीतोद
यो भवेत् चन्द्रस्थाने वहत्यर्को रविस्थाने च चन्द्रमाः ८१ प्रथमे मनसोद्वेगं धनहानिर्द्वितीयके तृती

स्व० ४

येगमने प्रोक्तं इष्टनाशं चतुर्थके ८२ पंचमे राजविध्वंसं षष्ठे सर्वार्थनाशनम् सप्तमे व्याधिदुः
खानि अष्टमे मृत्युमादिशेत् ८३ कालत्रये दिनान्यष्टौ विपरीते यदा वहेत् तदा दुष्टफलं प्रोक्तं
किंचिन्न्यूने तु शोभनं ८४ प्रातर्मध्याह्नयोश्चन्द्रः सायंकाले दिवाकरः तदा नित्यजयो लाभो विप
रीते विपर्यये ८५ वामे वा दक्षिणे वापि यत्र संक्रमते रविः कृत्वा तत्पादमादौ च यात्रा भवति
सिद्धिदा ८६ चन्द्रः समपदः कार्यो रविस्तु विषमः सदा पूर्णपादं पुरस्कृत्य यात्रा भवति सिद्धिदा ८७
चन्द्रवारे चतुष्पादः पंचपादस्तु भास्करे एवं च गमने प्रोक्तं साधयेत् भुवनत्रयम् ८८ यत्राङ्गे वहते
वायुस्तदंगस्य करस्तलं सुप्तोत्थितो मुखं स्पृष्ट्वा लभते वांछितं फलं ८९ परदत्ते तथा ग्राह्ये गृहान्नि
र्गमनेपि च यदंगे वहते नाडी ग्राह्यं तेन करांघ्रिणा ९० न हानिः कलहो नैव कंटकैर्नापि भिद्यते ।
निवर्तते सुखेनैव सर्वोपद्रववर्जितः ९१ गुरुबंधुनृपामात्याश्चान्येपि शुभदायिनः पूर्णांगे खलु
कर्तव्याः कार्यसिद्धिमभीप्सिता ९२ अरिचौराधमर्णाद्या अन्येपि वादिनिग्रहाः कर्तव्या खलि
क्तायां जयलाभसुखार्थिभिः ९३ दूरदेशे विधातव्यं गमनं तु हिमद्युतौ अभ्यर्णदेशे दीप्ते तु तर।
णाविति केचन ९४ शून्यनाड्यां विपर्यस्तं यत्पूर्वं प्रतिपादितम् जायते नान्यथा चैव यथा सर्वज्ञ

राम ४

भाषिते ९५ यत्किंचित्सर्वमुद्दिष्टं लाभादिसमरागमे तत्सर्वं शुभनाडीषु जायते निर्विकल्पकम् ९६
व्यवहारे खलोच्चाटे द्वेषिविद्यादिवंचके कुपितस्वामिचौराद्याः पूर्णस्थाः स्युर्भयंकराः ९७ दूराध्वाने सु
भश्चंद्रो निर्विघ्नोऽभीष्टसिद्धिदः प्रवेशकार्यहेतौ तु सूर्यः शीघ्रं प्रशस्यते ९८ चंद्रचारे विषं हंति सूर्ये बालो
वशं नयेत् सुषुम्नायां भवेन्मोक्षो देवकोटिद्विधा स्थितः ९९ अयोग्ये योग्यता नाडी योग्यस्थानेऽप्य
योग्यता कार्यानुबंधनो जीवः कथं रुद्र समाचरेत् १०० शुभाशुभानि कार्याणि क्रियंते हर्निशं सदा न
दा कार्यनिरोधेन कार्यनाडीप्रचालनम् अथ इडा स्थिरकर्माण्यलंकारे दूराध्वगमने तथा आश्र
मे धर्मप्रासादे वस्तूनां संग्रहेऽपि च २ वापीकूपतडागादिप्रतिष्ठा स्तंभदेवयोः यात्रादाने विवाहे च व
स्त्रालंकारभूषणे ३ शांतिके पौष्टिके चैव दिव्यौषधिरसायने स्वस्वामिदर्शने मैत्रे वाणिज्ये धनसंग्रहे
४ गृहप्रवेशे सेवायां कृष्यां च बीजवापने शुभकर्मणि संधौ च निर्गमे च शुभः शशी ५ विद्यारंभादिकार्ये
षु बांधवानां च दर्शने जन्ममोक्षे च धर्मे च दीक्षायां मंत्रसाधने ६ कालविज्ञानसूत्रे तु चतुष्पादगृहागमे
कालव्याधिचिकित्सायां स्वामिसंबोधने तथा ७ गजाश्वारोहणे धन्वी गजाश्वानां च बंधने परोपकरणे चै
व निधीनां स्थापने तथा गीतवाद्यादिनृत्यादौ गीतशास्त्रविचारणे पुरग्रामनिवेशे च तिलके क्षेत्रधार

णे ८ आर्द्रिशाकेविषादिचरवरितेम्हिंकेनेपिवा खजनस्वामिसंवेधेयान्यादिदाहसंग्रहे ९ स्त्रीणांदंना
ख॰ दिमर्दनायोहूहेरागमनेनथा गुरुशस्त्राविषादीनांचालनेचवराननेे १० उग्रयोम्निच्छिदस्त्रोतंकेयोगाभ्यासा
५ दिकर्मच नत्रापिवर्जयेद्वायुरुलेजस्थाकाशमेवच सर्वकार्याणिसिद्ध्यंतिदिवारात्रिगतान्यपि सर्वे शु
६ भकार्येषुचंद्रवारःप्रशस्यते ११ अथपिंगला कठिनक्रूरविद्यानांपठनेपाठनेनथा स्त्रीसंगेवेश्या
गमनेमहानौकादिरोहणे १२ भ्रष्टकार्येमद्यपानेवीरमंत्राद्युपासने वह्नौलोष्ठमदेशादिविषदाना
दिवैरिणां १४ शस्त्राभ्यासेचगमनेमृगयापशुविक्रये यष्टिकायांचपाषाणेरत्नवर्षणदारुणे १५ गम्या
भ्यासेयंत्रनंत्रेदुर्गापर्वतरोहणे घूतेचौरेगजाश्वादिरथसाधनवाहने १६ व्यायामेमारणेच्चाटे ष
टकर्मादिकसाधने यक्षिणीयक्षवेतालाःविषभूतादिनिग्रहे खरोष्ट्रमहिषादीनांगजाश्वानांचरो
हणे नदीजलौघतरणेभेषजेलिपिलेखने १७ मारणेमोहनेस्तंभेविद्वेषोच्चाटनेवशे प्रेरणाकर्षणे
क्षोभेदानेचक्रयविक्रये १८ खड्गहस्तेवैरियुद्धेभोगेवाराजदर्शने भोज्येस्नानेव्यवहारेकृत्येदीक्षेरवि
स्युभः १९ मनामात्रेणमेदामैत्रीक्षोणवश्यादिकर्माणि शयनेसूर्यवाहेचकर्तव्यंसर्वदाबुधैः २० कूमा
णि सर्वकार्याणिविविधानिच नानिसिध्यंतिसूर्येणनात्रकार्याविचारणा २१ अथसुषुम्नालक्षणं वा राम
५

चे

मेक्षणंदक्षेयदावहतिमारुतः सुषुम्णासाचविज्ञेयासर्वकार्यहरास्मृता तस्यांनाड्यांस्थितोव
ह्निर्ज्वलतेकालरूपिणम् २३ विषुवंतंविजानीयात्सर्वकार्यविनाशनं क्षणंवामेक्षणंदक्षेविष
मंभावमादिशेत् २४ विपरीतंफलंतस्यज्ञातव्यंचवरानने उभयोरेवसंचारेविषुवंतंविदुर्बुधाः
२५ नकुर्यात्क्रूरसौम्यानितत्सर्वंनिष्फलंभवेत् जीवितेमरणेप्रश्नेलाभालाभौजयाजयौ वि
षमेविपरीतंस्यात्संस्मरेज्जगदीश्वरम् २६ ईश्वरेचिंतितंकार्यंयोगाभ्याससमादिकर्मसु अन्यत्तत्र
नकर्तव्यंजयलाभसुखैषिभिः २७ सूर्येणवहमानायांसुषुम्णायांमुहुर्मुहुः शापंदद्याद्व
रंदद्यात्सर्वंथाचतदन्यथा २८ नाडीसंक्रमणेकालेतत्वसंक्रमणेतथा शुभंकिंचिन्नकर्तव्यंपु
ण्यदानादिकिंचन २९ विषमस्योदयेयात्रामनसापिनचिंतयेत् यात्राहानिकरीयस्यमृत्युः
क्लेशोनसंशयः ३० पुरोवामोर्ध्वतश्चंद्रोदक्षाधःपृष्ठतोरविः पूर्णरिक्तविवेकोयंज्ञातव्योदेशि
कैःसदा ३१ ऊर्ध्ववामाग्रतोदूतोज्ञेयोवामपथेस्थितः पृष्ठेदक्षेतथाधस्तात्सूर्यवाहगतःशुभः
३२ अनादिविषमासंधिर्निराहारेनिराकुलाम् परेसूक्ष्मेविलीयेतसासंध्यासंधिरुच्यते ३३ न
संध्यासंधिमित्याहुःसंध्यासंधिर्निगद्यते विषुवत्संधिगःप्राणःसासंध्यासंधिरुच्यते ३४ नवेदं

वेदमित्याहुः वेदो वेदो न विद्यते परात्मा विद्यते येन स वेदो वेद उच्यते ३५ इति नाडीभेदः अथ
स्व° तत्वनिर्णयः श्रीदेव्युवाच देवदेव महादेव सर्वं मे सारतारकं स्थितं त्वदीये हृदये रहस्यं वद मे प्रभो
६ ३६ ईश्वर उवाच स्वरज्ञानरहस्येन न किंचिदिष्टदेवता स्वरज्ञानरतो योगी स योगी परमो मतः ३७
6 पंचतत्वाद्भवेत्सृष्टिस्तत्वे तत्वं विलीयते पंचतत्वं परं तत्वं तत्वातीतं निरंजनम् ३८ तत्वानां ना
म विज्ञेयं सिद्धियोगेन योगिनाम् भूतानां दुष्टचिह्नानि जानातीह स्वरोत्तमः ३९ पृथिव्यापस्त
था तेजो वायुराकाशमेव च पंचभूतात्मकं सर्वं यो जानाति स पूजितः ४० सर्वलोकस्य जीवानां न दे
हभिन्नं तत्वकम् भूर्लोकात्सत्यपर्यंतं नाडीभेदः पृथक् पृथक् ४१ वामे वा दक्षिणे वापि उदयाः पं
च कीर्तिताः अष्टधा तत्वविज्ञानं शृणु वक्ष्यामि सुंदरि ४२ प्रथमे तत्वसंख्यानं द्वितीये श्वाससंधि
षु तृतीये स्वरचिह्नानि चतुर्थे स्थानमेव च ४३ पंचमे तस्य वर्णास्यु षष्ठे तु प्राणमेव च सप्तमे स्वादसं
युक्तं अष्टमे गतिलक्षणम् ४४ एवमष्टविधं प्राणं विषुवंतं चराचरम् स्वरात्परतरं देवि नान्यथा
त्वंबुजासने ४५ निरीक्षितव्यं यत्नेन यदा प्रत्यूषकालतः कालस्य वंचनार्थाय कर्म कुर्वंति यो
गिनः ४६ श्रुत्योरंगुष्ठकौ मध्यांगुल्यौ नासापुटद्वये वदने त्रांत्यकोपांत्यांगुलि देशो दृग्नयोः ४७ राम
६

अस्तांतस्तुपृथिव्यादितत्वज्ञानंभवेत्क्रमात् पीतश्वेतारुणश्यामैर्विंदुभिर्निरुपादिरवः ४८ द
र्पणेनसमालोक्यतत्रश्वासंविनिक्षिपेत् आकारैस्तुविजानीयात्तत्वभेदंविचक्षणः ४९ चतुरस्रंचा
र्धचंद्रंत्रिकोणंवर्तुलंस्मृतम् बिंदुभिस्तुनभोज्ञेयमाकारैस्तत्वलक्षणम् ५० मध्येपृथ्वीह्यधश्चा
पश्चोर्ध्वंवहतिचानलः तिर्यग्वायुप्रवाहश्चनभोवहतिसंक्रमे ५१ आपःश्वेताक्षितिःपीतारक्त
वर्णोहुताशनः मारुतोनीलजीमूतआकाशःसर्ववर्णकः ५२ स्कंधद्वयेस्थितोवह्निर्नाभिमूले
प्रभंजनः जानुदेशेक्षितिस्तोयंपादांतेमस्तकेनभः ५३ प्रथमेवहतेवायुःद्वितीयेवहतेनलः
तृतीयेवहेन्माहेयश्चतुर्थेवारुणंवहेत् ५४ माहेयंमधुरंस्वादंकाषायंजलमेवच तिक्तंतेजः
समीराम्लआकाशंकटुकंतथा ५५ अष्टांगुलंवहेद्वायुरनलश्चतुरंगुलः द्वादशांगुलमाहेयंषोड
शांगुलवारुणम् ५६ ऊर्ध्वंमृत्युरधःशांतिस्तिर्यगुच्चाटनंतथा मध्येस्तंभंविजानीयात्नभःसर्व
त्रमध्यमः ५७ पृथिव्यांस्थिरकर्माणिचरकर्माणिवारुणे तेजसिक्रूरकर्माणिमारणोच्चाटनेनिले
५८ व्योम्निनकिंचित्कर्तव्यमभ्यसेद्योगसेवया शून्यतासर्वकार्येषुनात्रकार्याविचारणा ५९ पृ
थ्वीजलाभ्यांसिद्धिःस्यान्मृत्युर्वह्नौक्षयोनिले नभसिनिष्फलंसर्वंज्ञातव्यंतत्त्ववेदिभिः ६० चिर

स्व॰ १७

लाभः स्थितिर्निर्णयानन्दाणतोयतत्त्वतः । हानिः स्यादग्निवायुभ्यां नभसो निष्फलं भवेत् ६१ पीतः श
नैर्मध्यवाही हनुं यावद्गुरुध्वनिः । मध्यमः पार्थिवो वायुः स्थिरकार्यप्रकाशकः ६२ अधोवाही गुरुध्वानः
शीघ्रगः शीतलः स्थितः । यः षोडशांगुलो वायुः स आपः शुभकर्मकृत् ६३ आवर्तगश्चात्युष्णोदि
शोणाभश्चतुरांगुलः ऊर्ध्ववाही च यः क्रूरः कर्मकारी स तैजसः ६४ उष्णशीतः कृष्णवर्णस्तिर्यग्गामी
चाष्टांगुलः वायुः पवनसंज्ञो यश्चरकर्मसु सिद्धिदः ६५ यः समीरः समरसः सर्वतत्त्वगुणावहः अम
रं तं विजानीयाद्योगिनां योगदायकम् ६६ तथा च पीतं चैव चतुष्कोणं मधुरं मध्यमाश्रितम् भो
गदं पार्थिवं तत्त्वं प्रवाहे द्वादशांगुले श्वेतमर्धेन्दुसंकाशं स्वादुकाषायमार्द्रकम् लाभकृद्वारुणं त
त्त्वं प्रवाहे षोडशांगुले रक्तं त्रिकोणं तीक्ष्णं स्यादूर्ध्वमार्गप्रवाहकम् दीप्तं च तैजसं तत्त्वं प्रवाहे चतुरांगु
ले ६७ नीलं च वर्तुलाकारं स्वादम्लं तिर्यगाश्रितम् चपलं मारुतं तत्त्वं प्रवाहेऽष्टांगुलं स्मृतम् ६८।
वर्णाकारस्वादवहैरव्यक्तं सर्वगामि च । मोक्षदं नाभसं तत्त्वं सर्वकार्येषु निष्फलं ६९ पृथ्वीजलेशु
भे तत्त्वे तेजो मिश्रफलोदये । हानिमृत्युकरौ पुंसामशुभौ व्योममारुतौ ७० आपूर्वपश्चिमे पृ
थ्वी तेजश्च दक्षिणे तथा वायुश्चोत्तरदिग्ज्ञेयो मध्ये कोणगतं नभः ७१ चंद्रे पृथ्वीजले स्यातां सूर्ये

राम ७

चाग्निर्यदा भवेत् तदा सिद्धिर्न संदेहः सौम्या सौम्येषु कर्मसु १७ लाभः पृथ्वीकृतो वह्नौ स्यान्निशायांला
भक्कम्नलम् वन्हौ मृत्युर्हानिर्वायौ नष्टं स्यात् दहेन्नाविति १८ आयानि वारुणे तत्वे तत्रस्थायिस्तु भाङ्गिनो
त्रयानि वायुतो न्यत्र हानिर्मृत्युर्नभे नले १९ पृथिव्यां मूलचिंता स्यात् जीवस्य जलवातयोः तेजसो धा
तुचिंता स्यात् शून्यमाकाशतो भवेत् पृथिव्यां बहुपादाः स्युः द्विपदा तोयवायुतः तेजसी च चतुष्पादा
नभसि पादवर्जितः कुजो वन्हि रविः पृथ्वी सौरी रापः प्रकीर्तितः वायुस्थाने स्थितो राहुर्दक्षरंध्रप्र
वाहकः २० जले चेन्दुर्बुधः पृथ्वी गुरुर्वातः सितोनलः वामनाडीस्थिताः सर्वे सर्वकार्येषु निश्चिताः
२१ बुधोनलादि कुम्भश्चाऽवन्हिर्रविः कुजस्तथा वायुराहुशनिर्व्योम्नि गुरुरेव प्रकीर्तिता २२ पृथिवी
मूलविज्ञाने जीवज्ञाने जलेन तथा आग्नेयो धातुविज्ञाने व्योम्नि शून्यं विनिर्दिशेत् २३ तुष्टिः पुष्टिः रति।
क्रीडा जयहर्ष्या धरातले तेजोवायोश्च सुप्तः ज्वरकंपश्च वासिनः २४ गतायुर्मृत्युराकाशे चैव प्राव
स्थाप्रकीर्तिताः द्वादशैतास्त्रयत्नेन ज्ञातव्या देशिकैः सदा २५ पूर्वायां पश्चिमे याम्ये उत्तरस्यां यथाक्र
मम् पृथिव्यादीनि भूतानि बलिष्ठानि विनिर्दिशेत् २६ पृथिव्यापस्तथा तेजो वायुराकाशमेव च।
पंचभूतात्मको देहो ज्ञातव्यश्च वरानने २७ अस्थिमांसत्वचा नाडी रोमं चैव तु पंचमं पृथिवी पंचगु

णाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ८८ शुक्रशोणितमज्जा च मूत्रं लाला च पंचमं आपः पंचगुणाः प्रोक्ताः
स्व॰ ब्रह्मज्ञानेन भाषितं ८९ क्षुधा तृषा तथा निद्रा कान्तिरालस्यमेव च तेजः पंचगुणाः प्रोक्ता ब्रह्मज्ञानेन भा
८ षितम् ९९ धावनं वलनं गमनं संकोचनप्रसारणं वायुपंचगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितं ९० राग
8 द्वेषस्तथा लज्जा भयं मोहश्च पंचमः नभः पंचगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ९१ पृथिवी पलपंचा
शच्चत्वारिंशदापस्तथा तेजस्त्रिंशद्धि जानीयाद्वायुर्विंशतिर्दिङ्नभः ९२ पार्थिवे चिरकाले च लाभश्चापि
तणमेव च जायते पवनात्स्वल्पसिद्धिः स्याद्व्योम्नि विनश्यति ९३ पृथिवी पंच आपो वेदा गुणास्तेजो द्विवायु
तः नभ एकगुणं चैव तत्त्वज्ञानमिदं भवेत् ९४ फूत्कारकृत्प्रस्फुटिता विदीर्णा पतिता यथा ददाति सर्व
कार्येषु अवस्थासदृशं फले ९५ धनिष्ठा रोहिणी ज्येष्ठानुराधा श्रवणस्तथा अभिजिता उत्तराषाढा पृ
थ्वी तत्त्वमुदाहृते पूर्वाषाढा तथाश्लेषा मूल आर्द्रा च रेवती उत्तराभाद्रपद तोयतत्त्व शतभिषा प्रिये
९७ भरणी कृत्तिका पुष्य मघा पूर्वा च फाल्गुनी पूर्वाभाद्रपदा स्वाती तेजस्तत्त्वमिति प्रिये ९८ विशाखो
त्तरफाल्गुन्यौ हस्तचित्रा पुनर्वसो अश्विनी मृगशीर्षे च वायुतत्त्वमुदाहृतम् २०० वृत्तं नाडीस्थितो
दूतो यत्पृच्छति शुभाशुभं तत्सर्वं सिद्धिमायाति शून्ये शून्यं न संशयः २०१ तत्त्वे रामा जयं प्राप्तः सत राम
८

त्वेचयतेजयः कौरवानिहताः सर्वेयुद्धेतत्वविपर्यये २ जलेनोनरीयसेस्कायास्त्रसारादयथागु
रोः केषांचिज्ज्ञायतेतत्वेभावनाविमलात्मना ३ अथपंचतत्वध्यानम् लंबीजंधरणींध्यायेच्च
तुरस्त्रंसपीतभं सुगंधंस्वर्णवर्णत्वमारोग्यंदेहलाघवम् ४ वंबीजंवारुणंध्यायेदर्धचंद्रश
शिप्रभम् क्षुत्पिपासादिसहिष्णुत्वंजलमध्येषुमज्जनम् ५ रंबीजेशिखिनंध्यायेत्त्रिकोणमरुण
प्रभम् बह्वन्नपानभोक्तृत्वमातपाग्निसहिष्णुता ६ यंबीजंपवनंध्यायेत्वर्तुलंश्यामलप्रभम्
व आकाशगमनाद्यंचपक्षिवद्गमनंतथा ७ हंबीजंगगनंध्यायेन्निराकारंबहुप्रभम् ज्ञानंत्रिकालविष
यमैश्वर्यमणिमादिकम् ८ स्वरज्ञानीनरोयत्रधनेनाधिकतःपरम् गम्यतेस्वरज्ञानेनअनायासःफ
लंभवेत् ९ इतितत्वध्यानम् अथयुद्धविजयः देव्युवाच॥ देवदेवमहादेवमहाज्ञानंस्वरोदयम्।
त्रिकालविषयंचैवकथंभवतिशंकर १० ईश्वरउवाच अर्थकालजयप्रश्नेशुभाशुभमितित्रिधा एतत्त्रिका
लविज्ञानंनान्यद्भवतिसुन्दरि ११ तत्वेशुभाशुभंकार्यंतत्वेजयपराजयः तत्वेसमर्घमहर्घंचतत्वंत्रिपदमु
च्यते १२ देव्युवाच देवदेवमहादेवसर्वसंसारसागरे किंनराणांपरंमित्रंसर्वकार्यार्थसाधकम् १३॥
शिवउवाच॥ प्राणएवपरंमित्रंप्राणएवपरःसखा प्राणतुल्यःपरोबंधुर्नास्तिनास्तिवरानने १४ श्रीदेव्यु।

वाच कथं प्राणस्थितो वायुर्देहे किं प्राणरूपकम् तत्त्वेषु संचरन् प्राणो ज्ञायते योगिभिः कथं २५ श्रीदेव
स्व° उवाच ॥ कायानगरमध्यस्थो मारुतो रक्षपालकः प्रवेशे दशभिः प्रोक्तो निर्गमे द्वादशांगुलः २६ गमने
२ च चतुर्विंशन्नेत्रवेदास्तथा धावने मैथुने पंचषष्टिश्च शयने च शतांगुलः २७ प्राणस्य तु गतिर्देवि स्वभावा
९ द्वादशांगुला भोजने वचने चैव गतिरष्टादशांगुला २८ एकांगुले कृते न्यूने प्राणे निःकामता मता आ
नंदस्तु द्वितीये स्यात् कविशक्तिः तृतीयके २९ वाचासिद्धिश्चतुर्थे तु दूरदृष्टिस्तु पंचमे षष्ठे त्वाकाशगमनं
चंडवेगश्च सप्तमे २· अष्टमे सिद्धयश्चाष्टौ नवमे निधयो नव दशमे दशमूर्तिश्च छायानाशो दशैकके
३१ द्वादशे हंसचारश्च गंगामृतरसं पिबेत् आनखाग्रे प्राणपूर्णे कस्य भक्ष्यं च भोजनम् २२ एवं प्राण
विधिः प्रोक्तः सर्वकार्यफलप्रदः ज्ञायते गुरुवाक्येन न विद्याशास्त्रकोटिभिः २३ प्रातश्चन्द्रो रविः सायं
यदि दैवान्न लभ्यते मध्याह्नमध्यरात्राभ्यां परतस्तु प्रवर्तते २४ दूरयुद्धे जयी चंद्रः समासन्ने दिवाकरः
वहन्नाड्यागतः पादः सर्वसिद्धिः प्रजायते २५ यात्रारंभे विवाहे च प्रवेशे नगरादिके शुभकार्येषु सर्वेषु चं
द्रचारः प्रशस्यते २६ अयनतिथिदिनेशैः स्वीयतत्त्वेन युक्तो यदि वहति कदाचिद्दैवयोगेन पुंसां स जय
ति रिपुसैन्यं स्तंभमात्रस्वरेण प्रभवति न च विघ्नं केशवस्यापि लोके २७ जीव रक्ष जीव रक्ष जीवांगे परि राम
२

यायव जीवोजयतियोयुद्धेजीवेनजयेतिमेदिनीम् २८ भूमौजलेचकर्तव्यं गमनेशांतिकर्मसु वह्नौ
वायौप्रदीप्तेषुखेषुनैवभयेष्वपि २९ जीवेनशस्त्रंबध्नीयाज्जीवेनैवविकाशयेत् जीवेनप्रक्षिपेच्छ
स्त्रंयुद्धेजयतिसर्वदा ३० आकृष्यप्राणपवनंसमारोहेत वाहनम् समुत्तरेत्पदंदद्यात्सर्वकार्याणिसा
धयेत् अपूर्णेशत्रुसामग्रीपूर्णेचस्वबलंयथा कुरुतेपूर्णतत्त्वस्थोजयत्येकोवसुंधराम् ३२ यन्नाडीव
हतेचांगंतस्यामेवाधिदेवता सन्मुखापिदिशातेषांसर्वकार्यफलप्रदा ३३ आदौतुक्रियतेमुद्रापश्चा
युद्धंसमाचरेत् सर्पमुद्राकृतायेनतेषांसिद्धिर्नसंशयः ३४ चंद्रप्रवाहेप्यथसूर्यवाहेभटाःसमायांति
चयोद्धुकामाः समीरणस्तत्त्वविदांप्रतीतायायातशून्यतासाप्रतिकालहेतुः ३५ यांदिशंवहतेवा
युर्युद्धेतद्दिशिदापयेत् जयत्येवनसंदेहःशक्रोपियदिचाग्रतः ३६ यत्रनाड्यांवहेद्वायुस्तदंगेप्राण
मेवच आकृष्यगच्छेत्कर्णांतंजयत्येवपुरंदरम् ३७ प्रतिपक्षप्रहारेभ्यःपूर्णांगंयोभिरक्षति नतस्य
रिपुभिःशक्तिर्बलिष्ठैरपिहन्यते ३८ अंगुष्ठतर्जनीवंशेपादांगुष्ठेतथाध्वनिः युद्धकालेचकर्तव्यं ल।
क्षयोधाजयीभवेत् ३९ निशाकरेरवौचारेमध्येयस्यसमीरणः ।स्थितोरक्षेद्दिगंतानिजयकांक्षीनरः
सदा ४० श्वासप्रवेशकालेतुदूतोजल्पतिवांछितम् तस्यार्थसिद्धिमायातिनिर्गमेनैवसंदिशेत् ४१ लाभा

दीन्यपिकार्याणि हृष्टानि कीर्तिनानि च जीवे विशंति सिध्यंति शून्ये निस्सरणे भवेत् ४२ नवेदद्वास्वकौ
स्व° १० याचस्त्रियो वा मा प्रशस्यते कुंभके पूर्वकाले च त्रयो नाडी त्रयो गतिः ४३ हकारस्य सकारस्य विना भेदं
स्वरः कथं सोऽहं हंसपदेनैव जीवो जयति सर्वदा ४४ शून्यांगं पूरितं कृत्वा जीवांगं गोपयेन्नृपः जीवां
गे१ गे घातमाप्नोति शून्यांगं वर्जितं सदा ४५ वामे वा यदि वा दक्षे यदि पृच्छति पृच्छकः पूर्णे घातो न जायेत
शून्ये घातं विनिर्दिशेत् ४६ भूतत्त्वेनोदरे घातः पदस्थाने बुना भवेत् उरुस्थाने ग्नितत्त्वेन करस्था
ने च वायुना ४७ शिरसि व्योमतत्त्वेन ज्ञातव्यो घातनिर्णयः एवं पंचविधो घातः स्वरशास्त्रे प्रकाशि
तः ४८ युद्धद्वये कृते प्रश्ने पूर्णस्य प्रथमो जयः रिक्ते चैव द्वितीयस्तु जयी भवति नान्यथा ४९ पूर्ण
नाडीगतः पृष्ठे शून्यमंगं तदग्रतः शून्यस्थाने कृतः शत्रुर्म्रियते नात्र संशयः ५० वामचारे समे नाम य
स्य तस्य जयो भवेत् पृच्छको दक्षिणे भागे विजयी विषमाक्षरः यदा पृच्छति चेद्दूतस्तदा स्थानमादि
शेत् पृच्छकं यदानुसूर्ये स्थलदा जानीहि विग्रहम् ५२ पार्थिवे च समं युद्धं सिद्धिर्भवति वारुणे युद्धे
हि तेजसि भंगो मृत्युर्वायौ नभस्यपि ५३ निमित्ततः प्रमादाद्वा यदा न ज्ञायते निलः पृच्छाकाले तदा
कुर्यादिदं यत्नेन बुद्धिमान् निश्चलो धारणं कृत्वा पुष्पं हस्तान्निपातयेत् पूर्णांगे पुष्पपतनं शून्ये वा राम
१०

तत्कालेववेदन ५८ निश्चन्तु प्रविशन्त्यापि प्राणमायेन निजेमनो मनोभंगमकुर्वाणः सर्वकार्येषु जी
वति ५५ स्वरज्ञानी बलादग्रे निःफलं कोटियाभवेत् इह लोके परत्रे च स्वरज्ञानी बली सदा ५८ द
वं॰के॰ ३ शशानामायुतं लक्षं देशाधिपबलं च वित् शतक्रतुः सुरेन्द्राणां कोटिगुणं भवेत् ५९ श्रीदेव्युवाच पर
स्परं मनुष्याणां युद्धे प्रोक्तो जयस्त्वया यमयुद्धे समुत्पन्ने मनुष्याणां कथं जयः ६० श्रीईश्वर उवाच॥
ध्यायेद्देवं स्थिरे जीवे जुहुयाज्जीवसंगमे इष्टसिद्धिर्भवेत्तस्य महालाभो जयस्तथा ६१ निराकारात्
समुत्पन्ने साकारे सकले जगत् तत्साकारं निराकारं ज्ञाने भवति तन्मयम् ६२ इति युद्धजयप्रकर
णं श्रीदेव्युवाच नरयुद्धं यमयुद्धं च त्वया प्रोक्तं महेश्वर ६३ इदानीं देवदेवानां वशीकरणकं वद ६४॥
श्रीईश्वर उवाच॥ चन्द्रं सूर्येन चाकृष्य स्थापयेज्जीवमण्डले आजन्मवशगा रामा कथितोयं तपोधने ६६
जीवेन गृह्यते जीवो जीवो यस्य प्रदीयते जीवस्थाने गतो जीवो बाला जीवान्तकारकः ६५ रात्र्यन्तयामवेला
यां प्रसुप्ते कामिनीजने ब्रह्मवीजं पिवेद्यस्तु बालायाः प्राणरो नरः ६९ आशाहंरं जपित्वा न तस्मिन्काले गते
सति तत्क्षणाद्दीयते चैव स्मोरमायानिकामिनी ६७ शयने वा प्रसंगे वा युवत्यालिंगनेपि वा यः सूर्येण
पिवेद्वायुस्स भवेन्मकरध्वजः ६८ स्वयमालिंगने शनसा प्रसंगे दक्षिणेपि वा नतत्क्षणाद्दापयेत्सलमो

हयेत्कामिनीस्नानम् ६९ सप्तम्नवत्रयः पंचवारान्संवत्सूर्ययोगे चेद्दिनसूर्यषडंकुत्वा वस्याभवतिका
मिनी ७० सूर्यचंद्रैसमाकृष्यमर्यांकोन्नायवेगाहयोः मन्त्रायवेमृविसृष्टावारंवारमिदंचरेत् ७१ स्ना
न्नाणमितिपनस्यया वन्हिप्रावशंगता पश्चाज्जाग्रतवेलायांचोष्णलेगलचवत्री ७२ अनेनविधिना
कामीवश्यायेत्सर्वकामिनी इदंनवाच्यमन्यस्मिनित्यज्ञापरमेश्वरि ७३ इतिवश्यप्रकरणम् अथगर्भ
प्रकरणम् ऋतुकालेभवान्नारीपंचमेन्द्रियदाभवेत् सूर्यचंद्रसमोयोगोमैथुनात्पुत्रसंभवः ७४ शाव
बल्लीगवांदुग्धंपृष्टाग्रोयोबहुतेयदा भर्तुरग्रेवेदद्याकं गर्भदेह्रित्रिभिर्वचः ७५ ऋतुस्नातापिवेच्चारी
ऋतुदानेनयोजयेत् रूपलावण्यसंपन्नोनरःस्निहःप्रसूयते ७६ सुषुम्णास्थसूर्यवाहेनऋतुदानेन
योजयेत् अंगहीनः प्रमान्यस्तुजायतेकृशविग्रहः ७७ विषमांकदिवारात्रौविषमांकदिनाधिपः चं
द्रेनैत्राग्निनत्वेषुवंध्यापुत्रमवाप्नुयात् ७८ ऋत्वारंभेरविः पुंसांऋत्वांतेतुसपाकरः अनेनक्रम
योगेनतादत्तेदेवदंडकः ७९ ऋत्वारंभेरविः पुंसांस्त्रियाचैवनिशाकरः उभयोः संगमेश्वेपि वंध्यापुत्र
मवाप्नुयात् ८० चेन्नीडीवहेत्प्रश्नेगर्भेकन्यातदाभवेत् सूर्याभवेत्तदापुत्रोद्वयोगर्भोविहन्यते ८१
चेत्स्त्रीपुरुषः सूर्येमध्यमार्गेनपुंसकः गर्भप्रश्नेयदाहतः एरंडपुत्रः प्रजायते ८२ पृथ्वीपुत्रीजले

पुत्रः कन्यका च युग्मं जने तेजसः गर्भपातः स्यान्नभसाथ नपुंसकः ८३ स्वन्ये स्वन्यं प्रयोगे युग्मं गर्भपात
स्वसे त्रमे सूर्यभागेन तेषु पुत्रश्चेन्द्रचारेण कन्यका ८४ विषुवे गर्भपातः स्यान्मावी वाथ नपुंसकः तत्व
विन्मा विजानीयात्कथितं तत्रसंदरि ८५ गर्भाधाने मारुते स्याद्बहुः स्वेदः शाखानां वारुणी सौख्ययु
क्तः गर्भस्रावी स्वल्पजीवी च वह्नौ भोगी भव्यो पार्थिवे नार्थयुक्तः ८६ धनवान्सौख्ययुक्तश्च भोगवा
न्गर्भसंस्थितः स्यात्रिस्त्रं वारुणे तत्वे व्योम्नि गर्भो विनश्यति ८७ माहेन्द्रे सुतोत्पत्तिर्वारुणे दुहिता
भवेत् शेषेषु गर्भहानिः स्यात्जायमानस्य वा मृतिः ८८ रविमध्यगतश्चन्द्रश्चन्द्रमध्यगतो रविः ज्ञा
तव्यं गुरुतः शीघ्रं न वेद्यं शास्त्रकोटिभिः ८९ इति गर्भप्रकरणम् अथ संवत्सरप्रकरणम् चैत्रशु
क्ले प्रतिपदि प्रातः तत्वविभेदतः पश्येद्विचक्षणो योगी दक्षिणे चोत्तरायणे ५० चन्द्रोदयस्य वेलायां वह
मानोपि तत्वतः पृथिव्यापस्तथा वायुः सुभिक्षं सर्वसस्यजम् ५१ तेजो व्योम्नि भयं चौरं दुर्भिक्षं कालतत्व
तः एवं तत्वफलं ज्ञेयं वर्षमासदिनेषु वा ५२ मध्यमा भवति श्रेष्ठा सर्वत्र कर्मसु देशभङ्गमहारोग
क्लेशकष्टादिकं खेदः ५३ मेषसंक्रान्तिवेलायां स्वरभेदं विचारयेत् संवत्सरफलं ब्रूयात् लोकानां त
त्वचिन्तकः ५४ पृथिव्यादिकतत्वेन दिनमासाब्दजं फलम् शोभनं च तथा दुष्टं व्योममारुतवह्निभिः

स्व- १२ 12

९५ सभिन्नेराहुवृद्धिःस्याद्रुजस्याश्चमंथरा वक्रेच्छिन्नयामौव्योमपृथ्वीतत्त्वेवहेद्यदि ९६ अतिवृष्टि
सभिन्नेस्याद्रोगपीडाव्योमवच वक्रसस्यानथाप्युष्णीस्याप्यलत्वेवहेद्यदि ९७ दुर्भिक्षेराष्ट्रभंगःस्यात्
रोगोत्पत्तिःसुदारुणा अल्पाद्यल्पतनाहृष्टिरग्नितत्त्वेवहेद्यदि ९८ उत्पातोपद्रवाभीतिरल्पावृष्टि
सुरातपः मेषसंक्रांतिवेलायांवायुतत्त्वेवहेद्यदि ९९ मेषसंक्रांतिवेलायांव्योमतत्त्वेवहेद्यदि तत्रापि
पिसूल्पताशेयासस्यादीनामलवस्यच १०० पूर्णप्रवर्तनेस्वासेस्वतत्त्वेनचसिद्धिदः सूर्यचंद्रेस्तथाभ्रेनैः
सेग्रहःसर्वसिद्धिदः १ विषमेवह्नितत्त्वस्यजायतेकेवलंनभः तन्नुच्याद्युत्तमेयाद्येद्विमासेचमरुद्यं
ता रवौसंक्रमणेनाडीगच्छतिचप्रवर्तयति स्वातित्वेवह्नियोगोपिरौरवयानिमंतले २ अनिसेवस्तरथु
करणम् अथरोगप्रकरणम् महीतत्त्वेस्वरोगंचजलेचजलमातरः तेजसिखेटवायौचशाकिनी
पितृदोषवे ४ आदोस्तन्यगतेरुनेपश्चात्पूर्णेविशेद्यदि मूर्छितोपिध्रुवंजीवेद्यद्यर्थपरिपृच्छति
५ यस्मिन्नंगेस्थितोजीवःतत्रस्थःपरिपृच्छति तदाजीवतिजीवोसौयदिरोगैरुपद्रुतः ६ दक्षिणेन
यदावायुर्दूतःखौरीबन्धुवैरैर्वदेत् तदाजीवतिजीवोसौचंद्रेसमयफलमनम् ७ जीवाकारेचवाधृत्वाजीवा
कारेविलोक्यच जीवस्थोजीवितेप्रश्नेतस्यस्याज्जीवितेफलम् ८ वामाचारुलयादूतःप्रवेशोयत्रवाह

राम १२

ते नत्रस्थं पृच्छते दूतस्तस्य सिद्धिर्न संशयः ९ प्रश्ने चाथःस्थितो जीवो ऽन्तर्गते जीवो हि जीवति ऊर्ध्वे चाधःस्थि
तो जीवज्जीवो याति यमालयम् १० विपरीताक्षरं प्रश्ने रिक्तायां पृच्छको यदि विपर्ययं च विज्ञेयं विषमस्या
दयोमति ११ चंद्रस्थाने स्थितो जीवो सूर्यस्थाने तु पृच्छकः तदा प्राणवियुक्तो सौ यदि वैद्यशतैर्वृतः १२ पिं
गलायां स्थितो जीवो वामे दूतस्तु पृच्छति तदापि म्रियते रोगी यदि त्राता महेश्वरः १३ एकस्य भूतस्य विप
र्ययेण रोगाधिभूतिर्भवतीह पुंसां तयोर्द्वयोर्बंधुसुहृद्विभूतिः पक्षद्वये व्यत्ययतो मृतिः स्यात् १४ इति रो
गप्रकरणम् अथ स्वरलक्षणम् मासादौ वत्सरादौ च पक्षादौ च यथाक्रमम् क्षयकाले परीक्षेत वायुचा
रवशात्सुधी १५ पंचभूतात्मके दीपे शिवरूपेण निश्चिते रक्षयेत् सूर्यवातेन तेजीवस्थिरो भवत् १६ मारु
ते बंधयित्वा तु सूर्ये वै पयते यदि अभ्यासाज्जीवते जीवः सूर्यकालेऽपि वंच्यते १७ गगनात्स्रवते चंद्रः का
यपद्मानि सिंचयेत् कर्मयोगसदाभ्यासैरमरः शशिसंश्रयात् १८ शशांकं वारयेद्रात्रौ दिवा वार्यो दिवाक
रः इत्याभ्यासरतो नित्यं स योगी नात्र संशयः १९ अहोरात्रं यदैकत्र वहते यस्य मारुतः तदा तस्य भवेदा
युः संपूर्णं वत्सरत्रयम् २० अहोरात्रद्वयं यस्य पिंगलायां सदा गतिः तस्य वर्षद्वयं प्रोक्तं जीवितं तत्त्ववि
भिः २१ त्रिरात्रं वहते यस्य वायुरेकपुटे स्थितः तदा संवत्सरायुष्यं प्रवदन्ति मनीषिणः २२ रात्रौ चेन्द्रः दि

वामस्वरोवहेद्यस्यनिरंतरं जानीयात्तस्यवैमृत्युःषण्मासाभ्यंतरेभवेत् २३ पक्षादिषोडशाहानियदिभा
स्व· नुर्निरंतरं वहेद्यस्यचवैमृत्युमेषाहेनचमासिके: २४ संपूर्णंवहतेसूर्यश्चंद्रमानैवदृश्यते पक्षेणजा
ले यतेमृत्युःकालज्ञानेनभाषितम् २५ संपूर्णंवहतेचंद्रःसूर्यंचनैवदृश्यते मासेनजायतेमृत्युःकाल
ज्ञानेनभाषितम् २६ मूत्रंपुरीषंवायुश्चसमकालंप्रवर्तते तदासौचलितोज्ञेयोदशाहान्म्रियतेध्रुवम्
13 २७ अरुंधतीभवेज्जिह्वाध्रुवोनासाग्रमेवच ध्रुवोविष्णुपदंज्ञेयंतारकामातृमंडलम् २८ अरुंधत्या
तीक्ष्णवेवैवविष्णोस्त्रीणिपदानिच आयुर्हीनानपश्यंतिचतुर्थंमातृमंडले २९ नवस्रवोसप्तघोष
पंचतारास्त्रिनासीकाजिह्वैकदिनेप्रोक्तम्म्रियतेमानवध्रुवम् ३० कोणदेसांगुलीभ्यांतुकिंचिन्नी
ड्यनिरीक्षयेत् यदानदृश्यतेबिंदुर्दशाहेनजयोमृत: ३१ अथनाडीज्ञानम् इडागंगेतिविज्ञेया
पिंगलायमुनानदी मध्येसरस्वतीविद्यात्प्रयागःसंगमस्तथा ३२ आदौसाधनमाख्यातसद्यःप्रत्य
यकारकम् बद्धपद्मासनोयोगीबंधयेदुड्डियानकम् ३३ पूरकःकुंभकश्चैवरेचकश्चतृतीयकः ज्ञातव्या कु
योगिभिर्नित्यंदेहसंसिद्धिहेतवे ३४ पूरकोकुरुतेपुष्टिंयातसाम्येनचैवच कुंभकःस्तंभनंकुर्यात्
जीवरक्षाचकारयेत्तविविद्धनम् ३५ रेचकोहरतेपापंकुर्याद्योगियदेव्रजेत् पश्चात्संग्रामवत्तिष्ठेत्

लयवेधेचकारयेत् ३६ चंद्रंपिबतिसूर्यश्चसूर्यंपिबतिचंद्रमाः अन्योन्यकालभावेनजीवेत्तत्वेद्म
केनारकम् ३७ खयंगेवद्धतेनाडीतेनाडीरोदनेकृतम् एवबद्धमसंचनैष वनजायतेध्रुवा ३८ मु
खनासाक्षिकर्णाभ्यामंगुलीभिर्निरोधयेत् तत्वोदयमितिज्ञेयंषण्मुखीकरणंप्रियः ३९ तस्यरू
पगतिस्वादोमंडलंलक्षणंत्विदम् योवेत्तिमानवोलोकेसंसर्गादपियोगवित् ४० निराशीनिष्कलो
योगीनकिंचिदपिचिंतयन् वासनामुन्मनीभूत्वाकालंजयतिलीलया ४१ विश्वसत्वेशिकाशक्ति
नेत्राभ्यांपरिदृश्यते तत्रस्थंतुमनोयस्ययाममात्रंभवेदिह ४२ तस्यायुर्वर्द्धतेनित्यंघटिकात्रयमानु
षः शिवेनोक्तंपुरातंत्रेसिद्धिमावरगह्वरे ४३ बद्धपद्मासनोयोगुदपवनंचसंनिरुध्यादिमच्युताम्
तस्यापानरंध्रेकुंभकेजितमनिलेप्राणशक्त्यानिरुद्धः एकीभूतेसुषुम्णाविवरमुपगतेब्रह्मरंध्रेचनी
त्वानिक्षिप्याकाशमार्गेशिवस्मरणतायांतियेकेपिधन्याः ४४ एतज्ज्ञानानियोयोगीएतत्पठतिनित्य
शः सर्वदुःखविनिर्मुक्तोलभतेवांछितंफलं ४५ स्वरज्ञानेशिरोयस्यलक्ष्मीपादतलेभवेत् एकत्रशभी
रेयस्यसर्वदातस्यसदाभवेत् प्रणवःसर्ववेदानांब्रह्मांडेभास्करोयथा मर्त्यलोकेतथापूज्यःस्वरज्ञो
पुमानपि ४७ नाडीत्रयंविजानातितत्वज्ञानेतथैवच नैवतेनभवेत्तुल्यंलक्षकोटिरसायनं ४८

पकाशं यः प्रदानां नाडीभेदं निवेदकम् पृथिव्यां नास्ति तद्द्रव्यं यद्दत्वा चानृणी भवेत् ४९ स्वरलग्नं
स्व· तथा युद्धे दिविवश्ये स्त्रियेन तथा गर्भाहृदे रोगकालाख्यं नवप्रकरणान्वितम् ५० एवं प्रवर्तितं लोके
१६ प्रसिद्धं सिद्धयोगिभिः श्रीविद्यार्कग्रहं जीयात् पठतां सिद्धिदायकम् ५१ इतिश्रीशिवोमासंवादात्मके
नवप्रकरणान्विते पवनविजयी स्वरोदये संपूर्णम् ॥ ॥ ॥

15